# कुक्कुटो जम्बुकश्च

कृषीवलः कश्चिदरण्यपरिसरभूमौ वसति स्म। जातु तस्य कुक्कुटः केदारे भक्ष्यमन्विष्यन्नास्त। जम्बुकः कश्चन बुभुक्षितः परिभ्रमंस्तमुद्देशमागतः। कुक्कुटं दृष्ट्वा प्रहृष्टः स शनैः पृष्ठतस्तमुपससर्प। कुक्कुटस्तमवेक्ष्य समीपस्थस्य तरोः शिखरमारोहत्।

वञ्चको भग्नाशस्तरोर्मूलमासाद्य कुक्कुटं प्रलोभयन्नाह – ‘भद्र! किमिति मां दृष्ट्वा वृक्षमारूढवानसि? अद्य खलु मृगैः पक्षिभिश्च सर्वैः सम्भूय समयः कृतः। तत्रैवं निर्णीतम् – ‘न कोऽपि कस्मा अपीतः परं द्रुह्येत्। न कमपि पीडयेत्। न च कञ्चन हन्यात्। किन्तु सर्वैः स्नेहेन वर्तितव्यम्। य एनं समयमुल्लङ्घते स तीव्रं दण्ड्येत’ - इति। तेनाहं

त्वां स्नेहेनालिङ्गितुं समागतः। कथं त्वं मत्तो बिभेषि?" - इति। कुक्कुट आह – 'सखे! सत्यमुभं भवता। परं त्वं बुभुक्षित इव दृश्यसे। अतः कथं वृक्षादवरोहेयम्?' - इति।

एवं वदत्येव तस्मिन् नातिदूरे व्याघ्रः कश्चित् समाययौ। कुक्कुटः शिरोधरामुन्नमय्य तमीक्षाञ्चक्रे। गोमायुस्तमपृच्छत् – 'भद्र! किं सादरं वीक्षसे?' कुक्कुट आह – 'सखे! नातिदूरे व्याघ्र आगच्छति'।

क्रोष्टा भीतः - 'भद्र! यद्येवं नमस्ते। समयान्तरे त्वां भूयो द्रक्ष्यामि' इत्युक्त्वा प्रस्थितः।

कुक्कुटस्तं सस्मितमाह – 'हंहो मा गमः। अहं तरोरवरोहामि। त्वं मां स्नेहेनालिङ्गिष्यसि। 'सर्वैः स्नेहेन वर्तितव्यम्' इति समये स्थिते

किमिति त्वं व्याघ्राद्भीतः?' - इति। शृगालः 'न खलु घातुकाः समयमनुवर्तिष्यन्ते!' इति वदन् द्रुतं पलायिता:।